## समासत्तौ । (५०/३३७१)

[1]सप्तम्याम् तृतीयायाम् इति वर्तते । समासत्तिः सन्निकर्षः । समासत्तौ गम्यमानायां तृतीयासप्तम्योः उपपदयोः धातोः णमुल् प्रत्ययो भवति । केशग्राहं युध्यन्ते, केशेषु ग्राहम्, केशैर्ग्राहम् । हस्तग्राहम्,[2] हस्तेषु ग्राहम्, [3]हस्तैर्ग्राहम् । युद्धसंरम्भादत्यन्तं [4]सन्निकृष्यन्ते इत्यर्थः ॥

## प्रमाणे च । (५१/३३७२)

[5]तृतीयासप्तम्योः इत्येव । प्रमाणम् आयामः, दैर्घ्यम् । प्रमाणे गम्यमाने तृतीयासप्तम्योः उपपदयोः धातोर्णमुल् प्रत्ययो भवति । द्व्यङ्गुलोत्कर्षं खण्डिकां छिनत्ति,[6] द्व्यङ्गुले उत्कर्षम्, द्व्यङ्गुलेनोत्कर्षम् । [7]त्र्यङ्गुलोत्कर्षम्[8] ॥

## अपादाने परीप्सायाम् । (५२/३३७३)

परीप्सा त्वरा । [9]परीप्सायां गम्यमानायाम् अपादाने उपपदे धातोः णमुल् [10]प्रत्ययो भवति । शय्योत्थायं धावति, शय्याया उत्थाय । एवं नाम त्वरते यदवश्यंकर्तव्यमपि नापेक्षते । [11]शय्योत्थानमात्रमाद्रियते । [12]रन्ध्रापकर्षं पयः पिबति । [13]भ्राष्ट्रापकर्षमपूपान् भक्षयति । परीप्सायाम् इति किम्? आसनादुत्थाय गच्छति ॥

## द्वितीयायां च । (५३/३३७४)

[14]परीप्सायाम् इत्येव । [15]द्वितीयान्त उपपदे परीप्सायां गम्यमानायां धातोः णमुल् [16]प्रत्ययो भवति । यष्टिग्राहं युध्यन्ते, यष्टिं ग्राहम्[17] । लोष्टग्राहम्,[18] लोष्टं ग्राहम् । एवं नाम त्वरते [19]यदायुधग्रहणमपि नाद्रियते । लोष्टादिकं यत् किंचिदासन्नं तद् [20]गृह्णाति ॥

## स्वाङ्गेऽध्रुवे । (५४/३३७५)

[21]द्वितीयायाम् इत्येव । [22]अध्रुवे स्वाङ्गवाचिनि द्वितीयान्त उपपदे धातोः णमुल् [23]प्रत्ययो भवति । अक्षिनिकाणं जल्पति[24] । भ्रूविक्षेपं [25]कथयति । अध्रुवे इति किम्? उत्क्षिप्य शिरः कथयति । यस्मिन्नङ्गे छिन्ने[26]ऽपि प्राणी न म्रियते तदध्रुवम् । '[27]अद्रवं मूर्तिमत् स्वाङ्गम्' (काशिका ४.१.५४) ॥

---

1. सप्तमीतृतीया इति क.ह. 2. युध्यन्ते इत्यधिकम् फ. ह. 3. हस्तैर्ग्राहम् नास्ति ह. 4. संनिकृष्य युध्यन्ते ब.क. 5. तृतीया सप्तमी च अनुवर्तते ह. 6. ह्रस्वः खण्डः खण्डिका इत्यधिकम् अ. 7. एवं त्र्यङ्गुलोत्कर्षः त्र्यङ्गुले उत्कर्षः त्र्यङ्गुलेनोत्कर्षः इत्यधिकम् अ.ब. 8. चतुरङ्गुलोत्कर्षम् चतुरङ्गुलेनोत्कर्षम् चतुरङ्गुल उत्कर्षम् इत्यधिकम् क.फ. 9. तस्यां फ. 10. प्रत्ययो नास्ति फ. 11. शय्योत्थानमाद्रीयते ह. 12. रन्ध्रादपकर्षं ब.क.अ.ह. 13. भ्राष्ट्रादपकर्षं ब.क.ह, उदाहरणमिदं नास्ति अ. 14. वाक्यमिदं नास्ति फ. 15. द्वितीयायां च ब. 16. प्रत्ययो नास्ति फ. 17. युध्यन्ते इत्यधिकम् फ. 18. युध्यन्ते इत्यधिकम् ह. 19. योद्धुम् इत्यधिकम् ब.फ.ह. 20. गृह्णन्ति ब. 21. वाक्यमिदं नास्ति फ. 22. अध्रुवस्वाङ्गवाचिनि ह. 23. प्रत्ययो नास्ति फ. 24. कण निमीलने चुरादि इत्यधिकम् क. 25. जल्पति फ, भ्रुवं विक्षेपं कथयति अ.ब. 26. भिन्ने ब, अपि नास्ति अ.ह. 27. अद्रवं मूर्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् । अतत्स्थं तत्र दृष्टं चेत् तेन चेत् तत्तथायुतम् ॥ क.